श्रीसुन्दरराजः



श्रीबदरीशतरङ्गिणी



देववाणी-परिषद्, दिल्ली
वि० २०३३ स्थापनाब्द १९५६ ई०

देववाणी-परिषद्, दिल्ली

जिगमिषन् बदरीं शतरङ्गिणीं
श्रयति यो बदरीशतरङ्गिणीम् ।
पठति वा बदरीशतरङ्गिणीं
स लभते बदरीं शतरङ्गिणीम् ॥
(श्रीबदरीशतरङ्गिणी, ११०)

"श्रीबदरीशतरङ्गिण्यां कविवरेण श्रीसुन्दरराजमहाभागेन स्वयं साक्षात्कृतस्य श्रीबदरीशक्षेत्रस्य काव्यमय वर्णनमुपन्यस्तम् । अनुष्टुभ्-उपेन्द्रवज्रा-उपजाति-मालिनी - वियोगिनी-वृत्तेषु श्रीबदरीनाथ-केदारनाथ-क्षेत्रस्थितानां नदीनां, मन्दिराणां, पुराणप्रसिद्धानां स्थानानां च तेन मनोरमं वर्णनं विहितम् । एतद्वर्णनं भौगोलिकदृशा पूर्णमुपयुक्तं वर्तते । .....तत्तत्स्थानसम्बन्धिनीनामनुश्रुतीनामपि सः संङ्केतं विदधाति । ... अलङ्काराणां प्रयोगः कवेरलङ्कारसिद्धिं द्योतयति ।

अस्मिन् काव्ये यात्रावृत्तान्तस्य शतककाव्यस्य, स्तोत्रकाव्यस्य च सङ्गमश्चकास्ति येनेदं पर्यटकानां, रसिकानां भक्तानाञ्च कृते समानरूपेण उपयोगित्वं प्रियत्वञ्च बिभर्ति ।

भारतस्य तत्तत्स्थान-परम्परानुश्रुति-संस्कृति-वर्णनपरेऽस्मिन् काव्ये यथा सहृदया राष्ट्रभक्तिभावनां द्रष्टुं शक्नुवन्ति तथैव अखिलं विश्वमेकं परिवारं मन्यमानाः मानवाः मानवतायाः कृते अमृतशान्तिसन्देशमपि साक्षात्कर्तुं शक्नुवन्ति ।"

(—डा० रमाकान्त शुक्लः
श्रीबदरीशतरङ्गिण्याः प्रास्ताविके)

[illegible]
२१.२.८४

[illegible]

नन्दनमाभिनन्दनम्!
Indu R R

उत्कृष्ट!
[illegible]
२१/२/८४

सं. सु. [illegible]
२१.२.८४

राजा [illegible]
२१.२.८४

[illegible]
२१/२/८४

[illegible]
धर्म वीर गर्ग

[illegible]
२१/२/८४

[illegible]
२१/२/८४

रत्न [illegible]

आद्या प्रसाद [illegible]
२१/२/८४

[illegible]

तिरुवनन्दपुरम् 29.2-178

[illegible]

[illegible]
२१.२.८४

पत्रकार
[illegible]
२१.२.८४

[illegible]
२१.२.८४

[illegible]
२१.२.८४

[illegible]
२१.२.८४

S. वनजनाभम्
कवि, गायक, व.

ज. प्र. भट्ट

सी. वी. शंकरना

श्रीबदरीशतरङ्गिणी

(आंग्लभाषानुवादसहितं संस्कृतकाव्यम्)

प्रणेता :

श्रीसुन्दरराजः

एम० एस्-सी० (रसायनशास्त्रे), आइ०ए०एस०

भारतसर्वकारस्य योजनायोगे संयुक्तसचिवः

नयी दिल्ली-११०००१

१९८३

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

श्रीबदरीशतरङ्गिणी

(आंग्लभाषानुवादसहितम् संस्कृतकाव्यम्)

लेखकः : श्रीसुन्दरराजः

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९

मुद्रकः : देववाणी प्रिण्टर्स
उत्तम नगर, नयी दिल्ली-११००५९

संस्करणम् : प्रथमम्, १९८३

मूल्यम् : विंशति रूप्यकाणि ० २० ००

SHRI BADARISHATARANGINI

(Sanskrit Poetry with English Translation)

Author : S. Sundararajan

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printer : Dev Vani Printers
Uttam Nagar, New Delhi-110059

Edition : First, 1983

Price : Rupees Twenty only Rs. 20-00

प्रास्ताविकम्

'देववाणी-परिषद्, दिल्ली' संस्थायाः सद्ग्रन्थप्रकाशानरूपमप्येकमुद्देश्यमस्ति। तदनुसारमद्यावधि परिषदा त्रयस्त्रिंशद् ग्रन्थानां प्रकाशनमनुष्ठितम्।

इदानीञ्च परिषदियम् तञ्जावूरजनपदान्तर्गतदेवनाथविलासग्रामे १३-९-१९३६ ई० तारिकायां श्रीमहाकविसार्वभौमविल्लूरनडादूर-श्रीनिधिराघवाचार्यस्वामिनः (जनकात्) श्रीमत्यां वञ्जुलवल्ल्यां (जनन्यां) समुत्पन्नेन, 'जगन्नाथसुप्रभातम्', 'सुरश्मिकाश्मीरम्'[1] इत्याद्यनेककाव्यप्रणेत्रा, रसायनशास्त्रे एम० एससी०-उपाधिधारिणा, आइ०ए०एस०-पदाधिकारित्वेन भारतसर्वकारस्य योजनायोगे संयुक्तसचिवपदमधितिष्ठता, सुरभारतीसपर्यापरेण, लब्धसारस्वतप्रसादेन श्रीसुन्दरराजमहाभागेन सद्य एव रचितमांग्लभाषानुवादसहितं 'श्रीबदरीशतरङ्गिणी'ति काव्यं प्रकाशयन्ती हर्षमनुविदन्ति।

श्रीबदरीशतरङ्गिण्यां कविवरेण श्रीसुन्दरराजमहाभागेन स्वयं साक्षात्कृतस्य श्रीबदरीशक्षेत्रस्य काव्यमयं वर्णनमुपन्यस्तम्। अनुष्टुभ्-उपेन्द्रवज्रा-उपजाति-शिखरिणी-वसन्ततिलका-शार्दूलविक्रीडित-स्रग्धरा-स्वागता- द्रुतविलम्बित-मालिनी-वियोगिनीवृत्तेषु श्रीबदरीनाथ-केदारनाथ-क्षेत्रस्थितानां नदीनां, मन्दिराणां पुराणप्रसिद्धानां स्थानानां च तेन मनोरम वर्णनं विहितम्। एतद्वर्णनं भौगोलिकदृशा पूर्णमुपयुक्तं वर्तते। मनोग्राम (माना)-तप्तकुण्ड-अलकनन्दा-उर्वशीपीठ हनुमानचट्टी-हरद्वार-ऋषीकेश-देवप्रयाग-रुद्रप्रयाग-मन्दाकिन्यलकनन्दासंगम-अगस्त्यकुटी-ऊखीमठ-गौरीकुण्ड- त्रियुगीनारायण - नारदकुण्ड-केदारधाम-नरनारायणकुबेरपर्वत-कर्णप्रयाग-नन्दप्रयाग-नन्दानिकी-विरही-गङ्गा-गरुडगङ्गा-पातालगङ्गा-लक्ष्मणगङ्गा - ज्योतिर्मठ (जोशीमठ)-नृसिंह - मन्दिर-दण्डधारा-वासुदेवमन्दिर-केदारनाथ-विष्णुप्रयाग- धवलीगङ्गा - पाण्डुकेश्वर-घण्टाकर्ण-नीलकण्ठ-पञ्चवदर्यादीनां वर्णने कविरयं क्वचिदपि भूगोलविरुद्धतां न श्रयते। तत्तत्स्थानसम्बन्धिनीनामनुश्रुतीनामपि सः सङ्केतं विदधाति। एतदर्थं २७, ३१, ३२, ३३, ३५, ३७, ३८, ४०, ४१, ४४, ४७, ५५, ५७, ५८, ६५, ६८ प्रभृतीनि पद्यान्यवलोकनीयानि सन्ति। श्लेष (प० ४६, १११)-निरुक्ति (१७)-उत्प्रेक्षा (२०, २५, २८, ४९)-यमक(११०, ११२)-प्रभृत्यलङ्काराणां प्रयोगः कवेरलङ्कारसिद्धिं द्योतयति। अस्मिन् काव्ये यात्रावृत्तान्तस्य शतककाव्यस्य, स्तोत्रकाव्यस्य, च सङ्गमश्चकास्ति येनेदं पर्यटकानां, रसिकानां भक्तानाञ्च कृते समानरूपेण उपयोगित्वं

---

१. सुरश्मिकाश्मीरमपि देववाणी-परिषदा सद्य एव प्रकाश्यते।

प्रियत्वञ्च बिभर्ति । कविर्भणति—

'जिगमिषन् बदरीं शतरङ्गिणीं श्रयति यो बदरीशतरङ्गिणीम् ।
पठति वा बदरीशतरङ्गिणीं स लभते बदरीं शतरङ्गिणीम् ।।" (११०)

बदरीशदर्शनावसरे स्फुरितः कवेर्भक्तिभावः (७६-१०८) कं सचेतस-मानन्दाम्बुधौ न निमज्जयति ?

भारतस्य तत्तत्स्थान-परम्परानुश्रुति-संस्कृतिवर्णनपरेऽस्मिन् काव्ये यथा सहृदया राष्ट्रभक्तिभावनां द्रष्टुं शक्नुवन्ति तथैव अखिलं विश्वमेकं परिवारं मन्यमानाः मानवाः मानवतायाः कृतेऽमृतशान्तिसन्देशमपि साक्षात्कर्तुं शक्नुवन्ति । यथा कविस्तथा कोऽपि जनो बदरीशमेवं प्रार्थयितुं स्वतन्त्रः—

'अखिलभुवनसृष्टिस्ते तु लीलाविभूतिः
अपि च विविधयोनौ क्षेपणं तत्र पुंसाम् ।
अविरतभवतान्तं मां तया लीलया त्वम्
अलमिति बदरीश ! क्षिप्रमेवोद्धरस्व ।। (९३)

देववाणी-परिषदा डा० शास्त्रपुरम्-रामकृष्ण स्वामिनाथकृतस्य 'श्री-बदरीशसुप्रभातम्' इत्याख्यस्य स्तोत्रकाव्यस्य सटीकं प्रकाशनमपि १९८३ तमेशवीयेऽब्दे कृतम् । इयं च 'श्रीबदरीशतरङ्गिणी' अपि १९८३ तमेऽब्दे एव प्रकाश्यते । द्वयोः काव्ययोस्तुलनात्मकमध्ययनं यथा शोधार्थिनां कृते रोचक-विषयतां निदधाति तथैव द्वयोः पाठोऽपि सहृदयानां कृते कमपि रसविशेषं जनयिष्यतीति मे दृढो विश्वासः ।

श्रीसुन्दरराजकृतां 'श्रीबदरीशतरङ्गिणी'मवलम्ब्य भारतीयसर्वोच्च-न्यायालयस्य न्यायाधीशैर्माननीयन्यायमूर्त्तिश्रीरङ्गनाथमिश्रमहाभागैः स्वाभिमतं प्रकटितम्; एतदर्थं परिषत्तेषामाभारमावहति ।

अन्ते चाहं देववाणी-परिषत्पक्षतः श्रीसुन्दरराजमहाभागं समभिनन्दयामि येनास्याः रसपरिप्लुतायाः काव्यकृतेः प्रणयनं कृत्वा संस्कृत-जगदुपकृतम् । कविना साकमस्माभिरपि काम्यते—

'बदरीशतरङ्गिणीस्तुतिः भवतात्सुन्दरराजनिर्मिता ।
बदरीशतरङ्गिणी यथा विबुधानां प्रियवाहिनी सदा ।।'

१३-१२-१९८३
देववाणी-परिषदोऽष्टमःस्थापनादिवसः

(डा० रमाकान्त शुक्लः)
महासचिवः
देववाणी-परिषद्, दिल्ली

आर ६, वाणी-विहारः,
नयी दिल्ली-११००५९

भारतीयसर्वोच्चन्यायालयस्य न्यायाधीशानां माननीय-
न्यायमूर्तिश्रीरङ्गनाथमिश्रमहाभागानाम्

अभिमतम्

हिमवतो गगनलेहिन्यो देवभूमयो गिरिशिखरमाला नो भारतवर्षस्योत्तरस्यां दिशि प्रहरित्वमनारतं बिभ्रत्यो वर्तन्ते। नूनं नगाधिराजोऽस्माकं मातृभूमेः प्राकृतिकः प्राचीरोऽस्ति। परमेश्वरपार्वतीश्वराधिवासः कैलाशोऽसौ विस्तीर्णे भारतवक्षसि प्रसरन्तीनां पावनगंगाब्रह्मपुत्रप्रभृतीनां बहूनां सरितामुद्गमः। नगाधिराजस्य हिमाच्छन्नशिखरश्रेणयो विविधविधिभिरेतद्देशीयानाकर्षयन्ति। महर्षयो मुनयश्चात्मामरकृतिषु वर्णयामासुरेनम्। अद्वितीयः कविः कालिदासो नैजेषु काव्येषु नितरामेतस्य प्रशंसां जगौ। केदारामर-बद्रीनाथायतनधामभूतो हिमालयः प्रत्येकस्य हिन्दोः पूतो गिरिरस्ति। कोऽप्यास्तिको वाहनेन सोपानद्वास्योपरि चलितुं नैव प्रस्तुतो भवति। देवाधिवासस्वर्गसोपानमार्गो हिमाच्छन्नाद्रित्यकासु भूत्वा यातीति विश्वस्यते। धर्मवीरो युधिष्ठिरो ज्येष्ठपाण्डवो हिमवतैव स्वर्गमगादिति जेगीयते। एषोऽस्ति पारम्परीणो विश्वासो यद्धिमालययात्रानिवार्या प्रत्येकस्य जीवने। पावनपर्वतयात्रायां निहितं विकटं संकटं विचिन्त्यापि स्वर्गमार्गोऽस्ति हिमालय इति विश्वासानुरोधात् सहस्राधिका जना नग्नपादैरेवात्मान्तिमासु यात्रास्वत्र विचेरुः। अतः श्रीमतो सुन्दरराजस्यात्रावर्जनं नैसर्गिकमेवास्ति। महान् संस्कृतज्ञः सहजसर्जनशक्तिसमन्वितो हिन्दुपरम्परासु निश्चलनिष्ठावानसौ निसर्गत उक्तवानत्र। हिमवत्परिवेशेणाभिभूतरुद्बुद्धश्च परम्पराः स्मारं स्मारं, नैसर्गिक सौन्दर्यं दर्शं दर्शमत एव मूर्तं विश्वं विस्मारं विस्मारं श्रीमत्सुन्दरराजमहोदयो नैजान् समृद्धान् विचारान् विवृतीकृतवान्। पारम्परीण ज्ञानमुपजीवत्यसौ, प्रदर्शयत्यात्मप्रभुत्वमभिव्यक्तौ, नियोजयति च नैजां कारयित्रीं प्रतिभां कल्पनाभिः क्रीडितुं स्वैरं स्वैरम्। सम्प्रति भारतीयप्रशासनसेवासु दक्षः सदस्यो योजनायोगे च संयुक्तसचिवपदमधितिष्ठन् श्रीमत्सुन्दरराजमहाभागः संस्कृतसाहित्ये धर्म-संस्कृतिप्रचारे च महतीं सेवां कृतवान्। आशासे यदनुशीलनमस्य काव्यस्य सुगमं सुरम्यं मनोज्ञं च भविष्यति।

१४-११-१९८३

रङ्गनाथ मिश्रः

५, सफदरजंगा मार्गः, नयी दिल्ली

पुरोवाक्

विदितचरमेव तत्रभवतां विदितवेदितव्यानां सततसेवितव्यानां अविरत-मनुसृतसनातनधर्ममार्गाणां विपश्चिदपश्चिमानां यदस्मिन्नस्मदीये भारतदेशे साधुजनादरपात्रभूतानि प्रभूतानि पवित्राणि क्षेत्राणि अत्र तत्र सर्वत्र विलसन्ती-ति । तानि क्षेत्राण्यटित्वा सर्वोऽपि भारतीयः विशिष्य हिन्दुमतीयः यथार्थमा-त्मानं कृतार्थं मन्यते । तेषां सर्वेषामपि क्षेत्राणां शीर्षरत्नमिव विद्योतते हृद्यं प्रत्नतमञ्च हिमगिरि शीर्षगतं सत्ययुगतस्समस्ताभिगतं श्रीकेदारबदरीक्षेत्र-युगम् । श्रूयते च बदर्यां कृतयुगारम्भे नरसम्भवसमनन्तरं भगवान् श्रीमन्नारायणः स्वयमेव नराय तत्त्वमुपदेष्टुं श्री बदरीनारायणरूपेण समजृम्भतेति । तपस्तप्यते नरर्षये तापत्रयव्यपोहनोपायमुपदिशतस्सालग्राम-शिलामूर्तेस्तापसरूपस्य तस्याश्रमपदमिह बदरिकाश्रममित्यपि व्यपदिशान्त । वैराग्यपीठप्रशस्तिभाजि केदारे भगवाँस्त्रिपुरहरः स्मरनिकरणानन्तरं तीव्रं तपस्तेपे इत्याख्यायते । पुनश्च महाभारतसमये वनवासनिरतान् पाण्डवा-ननुजिघृक्षुर्विरूपाक्षः तेभ्यः प्रत्यक्षीभूय तैः ग्रहीतुकामैरनुगम्यमानस्सपदि दुरालक्ष्यतां गतः धृतोक्षरूपः बिलं प्रविष्टः मध्यमपाण्डवेन धृतलांगूलेन बलेन बिचकर्ष इति च कश्चनोदन्तः कथ्यते । यत् बिलं यादृशंमाकृपृष्टच्छमाकुञ्चि-तपादं ककुद्मद्रूपं तत्र तादृशेनैव रूपेण यथा पाण्डवाँस्तथाऽस्मानप्यनुगृह्णान: तिष्ठति परमकारुणिकः परमेश्वरः ।

इदमपि विदितमेव यदिह हिन्दुमतानुगानां पुण्यतमानीति कीर्तितेषु चतु-र्धामसु प्रधानभूतं बदरीधामेति । तथाऽपि बौद्धमतस्योन्नत्यकाले तदनुयायिनः केचन बदरीधाम्नः अवनतिं वा बौद्धीकरणं वा अपेक्षमाणाः श्रीमन्नारायणस्य मूर्तिमपहर्तुमितः प्रयतितवन्तः । परन्तु प्रत्युत्पन्नमतयो देवालय निर्वाहकाः मा सा मूर्तिस्तेषांहस्ते पतदिति तां मूर्तिं अलकनन्दायां नारदकुण्डे चिक्षिपु-रिति कथा श्रूयते ।

श्रीमदादिशंकरभगवत्पादाः तुरीयाश्रमग्रहणानन्तरं ज्योतिर्मठे तपस्तप्त्वा ज्योतिस्स्वरूपमात्मानमात्मन्येवावलोक्य विदितवृत्तान्ताः स्वयमेव तां मूर्तिं नारदकुण्डादुद्धृत्य यथापूर्वं मन्दिरे प्रतिष्ठाप्य आगमोक्तरीत्या श्रीबदरीनाराण-पूजां पुनरारेभिरे इति तेषां चरितादेवावगम्यते । तेषामेवादेशेन केरलदेशाद-त्रागत्य विहितवास्तव्यैः नम्पूदिरिश्रोत्रियैः पुरुषानुक्रमेण श्रीबदरीनारायणस्य

पूजाऽद्यापि निर्वर्त्यमाना वर्तते। तादृगमिदं पुण्यक्षत्रं जन्मन्येकवारमपि सेवितुं यः कश्चन हिन्दुरन्तरंगेनाभिलषेदिति नैसर्गिकमेव। जनोऽयमपि बदरीसेवनकुतुकी बहुतिथात् कालात्कृतमनोरथः कालप्रतीक्षोऽस्थात्। तस्य संकल्पमन्तरेण तद्दर्शनं कथं वा सपद्यताम्? इममेवार्थं प्रतिपादयता मया श्रीबदरीशतरंगिण्यन्तर्गतोऽयं श्लोको रचितः।

"न कामकारेण न वा बलेन न वेदशास्त्रादिषु कौशलेन।
उपेत्य यं शक्यमुपासितुं नः ऋते तदिच्छां बदरीशमीडे॥"

अनुकूलो भगवत्संकल्पस्तावत् गतग्रीष्मसमये एव समपद्यत। प्राकृतिक-सौन्दर्यमयमनोहरदृश्यमध्ये मधुरतमसंनिवेशे विराजमानमुभयमपि धाम ससेवितम्। अन्तरंगगता आशातरंगिणी भगवद्दर्शनमात्रेण पावनीभूता कवितामयश्रीबदरीशतरंगिणी रूपेण प्रसुस्राव।

संस्कृतभाषायामभिरुचिः कवनशक्तिश्च मदीयाचार्यवर्याणां श्रीमतां पितृ-पादानां श्रीनिधिराघवाचार्यस्वामिनां कृपाकटाक्षेणैव मया साधिते। शैशव एव श्रीमन्तः तातपादाः मां संस्कृतमशिक्षयन्। तेभ्योऽहं गुरुकुलरीत्या काव्य-नाटकालंकारादिग्रन्थानपठम्। महाकवीनां विशिष्य कालिदासस्य सरल-सरसमनोहरकवितानां मधुरिम्णा हृतहृदयः स्वयमपि संस्कृते कविताः प्रणीय मन्दोऽपि कवियशः प्राप्तुममन्दप्रत्नशीलोऽभूवम्। श्रीतातपादास्तु स्वय-माशुकविसार्वभौमाः। तैर्विरचितानि हृद्यानि पद्यानि आकर्ण्यानन्दितुमनेके विद्वांसोऽस्मद्गृहमसकृदागच्छन्ति स्म। बालभावसुलभचापलतया कदाचन स्वकवितामपि तेषां पुरतः पठतो मे श्लाघापरैस्तैः प्रोत्साहनमेव कृतं न तु परिहसनम्। अनेन कवितारचने द्विगुणीबभूव मम यत्नः। एकदा श्रीपितृ-पादैः सह 'तिरुविडैमरुदूर्ग्रामे' भिक्षाचरणं कुर्वतां श्रीमतां श्रीकाञ्चीकाम-कोटिपीठाधिपतीनां जगद्गुरुशंकराचार्याणां श्रीचन्द्रशेखरेन्द्रसरस्वतीस्वामिनां संविधानं गतेन मया श्रीरामं प्रति प्रणीतः कश्चन श्लोकः पठितः यमाकर्ण्य मन्दस्मितसुन्दरवदनास्ते "बालकविरसीति" मामनुगृह्य दुकूलमेकमदापयन्। भगवतस्तथा आचार्याणामनुग्रहेण संस्कृते मम अभिरुचिः कवनकौशलं च यथाक्रमं परिववृधाते। १९५६ तमे संवत्सरे श्रीमत्याः गोदायाः तिरुप्पावै प्रबन्धः तथा श्रीमद्भक्तांघ्रिरेणुसूरेः 'तिरुप्पल्लियेषुच्चि' प्रबन्धश्च द्रामिड्याः संस्कृतपद्यैरनूद्य पुस्तकरूपेण प्रकाशनं नीतौ। तथा बह्वीषु, दैनिक-पाक्षिकमासिकासु तथा अन्यासु च पत्रिकासु च स्वकविताः प्रकाशिताः। १९८१ तमे संवत्सरे श्रीजगन्नाथसुप्रभातादिस्तोत्राणि आंगिलभाषाऽनुवादसहितानि

पुस्तकरूपेण प्रकाशितानि। श्रीकेदारनाथ-बदरीनाथ-यात्रायां स्वयं प्रसृतां श्री बदरीशतरंगिणीनाम्नीं स्त्रोत्ररूपिणीमिमां मम कवितां प्रकाशयितुमद्य समुद्यता श्रीदेववाणी-परिषद् मम धन्यवादार्हा। कृतिरियं बुधजनानां प्रमोदाय कल्पेतेति विश्वसिमि। श्रीमन्नारायणपरायणाः भक्तिमदग्रेसरास्तु दोषपूर्णा-यामप्यस्यां कृत्यां गुणलवग्राहिण एव स्युः। अन्ये यदि दोषपरायणा एव स्यु-रपि तथापि न मे किंचन हीयते। अथवा कोऽहमस्याः कृत्याः साधुत्वा-साधुत्वविषये आनन्दितुं वा शोचितुम् ?। एतद्विषये श्रीमान् बदरीनारा-यणो भगवानेव प्रमाणं यस्य प्रेरणया केवलमियं स्तुतिः विरचिता। यत्सत्यम्, यथा ध्रुवस्तुतौ वर्णितम्,

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना।
अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥"

अस्मिन् ग्रन्थे महाभारतवर्णितस्य सौगन्धिकोपाख्यानस्य स्थानमपि श्रीपाण्डुकेश्वरसमीपगतः पुष्पप्रभवो गिरिप्रदेश इति उल्लिखितम्। तथैव बदरीवर्त्मनि स्थितो हनुमांश्चट्टीति पर्वत एव स प्रदेशः यत्र पुष्पान्वेषकः भीमसेनः स्वमग्रजमपश्यदिति वर्णितम्। एतादृश उल्लेखः केवलमनुमाने-नैव कृतः।

अयं सिद्धान्तः कैश्चन इतिहासतत्त्वविद्भिश्चर्चितश्च। तैरप्यस्य उपपाद्यत्वमुपपन्नम्। वैमत्ये सति कवेः काव्यबन्धसमयसमुपपन्नस्वातन्त्र्य-मिति गृह्यताम्।

श्रीदेववाणी-परिषदः परिचालकेभ्यः विशिष्य डॉ० रमाकान्तशुक्लमहोदयेभ्यः तथा शिक्षामन्त्रालये उपपरामर्शदातृपदमलंकुर्वद्भ्यः डॉ० सी०आर० स्वामि-नाथमहाभागेभ्यश्च हार्दिकीं कृतज्ञतां विज्ञापयामि येषां महोपकारं प्रयत्नं च विना अस्य पुस्तकस्य प्रकाशनं असम्भवमभविष्यत्। श्रीदेववाणी-परिषदः ईदृशी संस्कृतसेवा उत्तरोत्तरमभिवर्धतामिति आशासानो विरमामि।

कार्तिक-पूर्णिमा, २०४०
२०-११-१९८३

श्रीसुन्दरराजः।

श्रीसुन्दरराजविरचिता

।। श्रीबदरीशतरंगिणी ।।

(१)

प्रपद्ये बदरीधाम हिमधामसमावृतम् ।
यत्र संनिहितौ नित्यं नरनारायणावृषी ।।

(२)

नारायणमृषिं वन्दे निर्दिशन्तं नरर्षये ।
कर्मज्ञानगतिं पुंसां कृत्याकृत्यमतिं तथा ।।

(३)

पूर्वजातं नराणां नो नरर्षिमहमाश्रये ।
यस्य नारायणो देवः साक्षाद्गुरुरिह स्वयम् ।।

(४)

नरनारायणाम्बां तां वन्दे नः प्रपितामहीम् ।
या पूज्यते मनोग्रामे मन्दिरे पार्श्ववर्तिनि ।।

(५)

बदरीं निकषा स्तब्धं शयानं शेषमाश्रये ।
तत्त्वं शृण्वानमक्षिभ्यां नारायणमुखेरितम् ।।

(६)

यत्र तार्क्ष्यस्तपस्तप्त्वा वर्षाणामयुतं त्रयम् ।
लेभे नारायणप्रीत्या वैकुण्ठे नित्यसूरिताम् ।।

(७)

नारदो यत्र देवर्षिः दक्षशापमलक्षयन् ।
तत्त्वं नारायणाख्यातं नित्यमाकर्ण्य नन्दति ।।

(८)

तप्तकुण्डमहं वन्दे नारायणदयाद्भुतम् ।
यत्र स्नातो जनो मार्ष्टि युगपत्कलमकल्मषौ ।।

(९)

यत्र पर्वतयोर्मध्ये नरनारायणाह्वयोः ।
वहत्यलकनन्दाख्या विष्णुगंगाऽलकापुरात् ।।

(१०)

वसुधारामुखीभिस्सा पथिधाराभिरेधिता ।
मनोग्रामे सरस्वत्या बृंहिता वहते यतः ।।

(११)

सा लोकविश्रुता देवी बदरीशतरंगिणी ।
या तनोति प्रवाहेण बदरीं शतरंगिणीम् ।।

(१२)

अतीव शीतामलकाप्रसूतामनेकपातां बदरीशपूताम् ।
अमन्दवातामतिवेगयातामम्मर्त्यगीतामनिशं भजे ताम् ।।

(१३)

श्री भैरवीचक्रपुटे बदर्यां तत्रोर्वशीपीठमधिष्ठितं तम् ।
वृतं सुपर्णोद्धवनारदाद्यैः नारायणर्षिं गुरुमाद्यमीडे ।।

(१४)

षण्मासकालं ससुखं नरेभ्यः षण्मासकालं निभृतं सुरेभ्यः ।
विभज्य पूजां भजमानमेवं भजे सुशीलं बदरीविशालम् ।।

(१५)

न कामकारेण न वा बलेन न वेदशास्त्रादिषु कौशलेन ।
उपेत्य यं शक्यमुपासितुं नः ऋते तदिच्छां बदरीशमीडे ।।

(१६)

नारायणं कारणमादिदेवं नरोपदेशाय कृतावतारम् ।
यतो निधीनामधिपः कुबेरो निषेवते किंकरतामुपेतः ।।

(१७)

नृणामियं भूः किल भोगभूमिः ततो निधीन्वाहय मानवेभ्यः ।
नारायणाज्ञामिति पालयन्यः लेभे कुबेरो नरवाहनत्वम् ।।

[कुबेरस्य नरवाहनत्वं न तु नरः तस्य वाहनमिति हेतोः
परन्तु नरेभ्यः वाहयतीति हेतोरिति कविहृदयम्]

(१८)

मुनिर्मनोग्रामसीपवर्तिगिरेर्गुहायां हिमशीतलायाम् ।
तपश्चरंस्तत्र चकार पूर्वं व्यासः पुराणानि च भारतञ्च ।।

(१९)

अधिष्ठितो व्यासगुहासमीपे गुहां गजास्यस्स गुहाग्रजन्मा ।
उत्पाट्य दन्तं व्यलिखत्खलु स्वं ग्रन्थान्पुरा व्यासकृतानशेषान्

(२०)

श्रीमान्हनूमान्धृतशैलरूपः विधाय साष्टांगमथ प्रणामम् ।
विनीतवेषः पथि यत्र भाति नारायणात्तत्त्वमिवाददानः ।।

(२१)

न किंनरा नापि सुरा न दैत्याः न राक्षसा नापि पिशाचयक्षाः
सुखेन शक्ता बदरीमवाप्तुं कथं मनुष्याः प्रभवन्तु नाम ?।।

(२२)

हिमाद्रिमारुह्य सिसेविषन्ते कथञ्चिदेत्यालकनन्दयोर्ध्वम् ।
मार्गे प्रयागांश्च बहूनतीत्य नारायणं केचन पुण्यभाजः ।।

(२३)

हरद्वारे गंगा हरचरणविन्याससुभगे
हृषीकेशे भूयो भुवमवतरन्तीं हिमगिरेः ।
प्रणम्य प्रस्थेयं प्रणिपतितुकामेन समये
वृतौ पूर्वाचार्यैरथ बदरिकानाथचरणौ ।।

(२४)

स पन्था गन्तव्यश्शिखरिकटिसंश्लेषकुटिलः
क्वचिद्गच्छन्नुच्चैरचलशिखरं चुम्बितुमिव ।
क्वचिद्गच्छन्नीचैरवटगतनद्यास्तटभुवि
नराणां यो दीर्घं तुलयितुमलं संसृतिपथम् ।।

(२५)

वनश्यामाः कूटाः कतिपय इमे कम्बलयुताः
शिलाप्राया एते तृणविलयतोऽनावृतियुताः ।
तृणानीता अन्ये ननु पथि तथा संनिदधते
यथा योगं सिद्धेरनुगुणमनूनं विदधते ।।

(२६)

ततो मध्येमार्गं सलिलवलिताभोगललितः
प्रयागो देवानामपि नयनसात्कर्तुमुचितः ।
सुदूरादायान्ती मिलति कलयन्त्यट्टहसितं
यतो भागीरथ्या सममलकनन्दा सुरधुनी ।।

(२७)

प्रयागे देवानां जयति सुभगं मारुतिगुरोः
ससीतासौमित्रेः रघुकुलपतेर्मन्दिरमपि ।
श्रुता त्रेताकाले किल बदरिका रामकलिता
प्रयागे देवानामभवदिति सा काचन कथा ।।

(२८)

श्रुता गंगा विष्णोः पदकमलतः पूर्वमुदिता
कथं गंगा यस्मादिह पतति कस्मादपि गिरेः ।
इमे मूर्ध्ना सर्वे खलु शिखरिणो विष्णुपदगाः
प्रसङ्गान्नूनं ते स्वयमुपगता विष्णुपदताम् ।।

[विष्णुपदमिति विष्णोः पदमाकाशश्च]

(२९)

रुद्रप्रयाग इति कश्चन रुद्रनाथ-
देवालयेन रुचिरस्तदनु प्रदेशः ।
केदारनाथहिमकूटतलप्रसूता
मन्दाकिनी मिलति साऽलकनन्दयाऽत्र ॥

(३०)

मन्दाकिनीतीरगते सुशीले कान्ते प्रशान्ते विमले प्रदेशे ।
मुनेरगस्त्यस्य तपोऽनुरूपं तपोवनं दीव्यति तत्र सेव्यम् ॥

(३१)

अभ्यर्थितो देवगणैः प्रणम्य तपोबलेन प्रतपन्नगस्त्यः ।
सूर्योपरोधाय समेधमानं विन्ध्याचलं यो विनतं वितेने ॥

(३२)

यादोगणानां शरणं प्रदाय वेलामतीत्योपरि वर्धमानम् ।
पुरा सुरैर्याचित एष भीतैः पयोधिमाचम्य लयं निनाय ॥

(३३)

अयं महर्षिस्स्वयमैन्द्रचापं प्रदाय रामाय रणे जयाय ।
उपादिशत्तं तपनञ्जपेति दशां दशास्यं दशमीं निनीषुः ॥

(३४)

एवं प्रभावं प्रणता अगस्त्यमनन्तरं ये बदरीविशालम् ।
भजन्ति ते प्राप्नुवते प्रसादं तुष्टस्य तस्य द्विगुणं ध्रुवं तत् ॥

(३५)

ऊखीमठो देश उषाभिधायाः बाणस्य पुत्र्याः अनिरुद्धपत्न्याः ।
केदारनाथस्य विधीयतेऽत्र षण्मासपूजा किल शीतकाले ।।

(३६)

ऊखीमठस्यास्य समीपदेशे चकास्ति काल्या अपि सिद्धिपीठम्
यत्र प्रतीत्या प्रणताः प्रभूतं प्रसादमासाद्य जयन्ति देव्याः ।।

(३७)

मन्दाकिनीतटपथेन गतेन गौरी-
कुण्डोऽथ निर्गलितसप्तजलोऽपि सेव्यः ।
गौरी यतः किल चचार महत्तपः प्राक्
कामान्तकं पतिमवाप्तुमनन्यकामा ।।

(३८)

तस्या विवाहमथ धूर्जटिना विधातुं
नारायणोऽप्युपगतस्त्रियुगी विभाति ।
संज्वालितः परिणयाय स वेदिवह्नि-
रद्यापि दीप्यति शुभे सविधे यदीये ।।

(३९)

केदारनाथनिलयं यत एष गन्ता
मार्गश्शिलोपरि हिमोपरि च प्रणीतः ।
कान्तो नितान्तमुपशान्तवनान्तरम्यः
मन्दाकिनीतटगतो जलपातशीतः ।।

(४०)

नारायणं तमथ नारदकुण्डमग्नम्
उद्धृत्य पूर्वमिव पूजितवान् बदर्याम् ।
स ह्यादिशंकरजगद्गुरुरन्तकाले
केदारनाथमभिगम्य समाधिमास्थात् ॥

(४१)

यो दक्षिणापथभवो गुरुरात्तदण्डः
रेवातटेऽप्यटितभारतभूमिरन्ते ।
केदारनाथनिलये कलयन्समाधिम्
ऐक्यं निरूपयति भारतसभ्यतायाः ॥

(४२)

जातो दक्षिणभारते शिशुवयस्यभ्यस्तविद्यः परम्
अद्वैतं स्वमतं स्वयं समभितो व्यापय्य संस्थाप्य च ।
चत्वारि प्रथितानि दिक्षु चतसृष्वाम्नायपीठान्यपि
द्वात्रिंशद्वयसा स शंकरगुरुर्लीनः परब्रह्मणि ॥

(४३)

नीतं क्वापि रसातलं कुमतिभिस्त्रातुं स वेदत्रयं
भीतान्पापविजृम्भणेन विबुधान्पातुं स्वमेवाश्रितान् ।
गीतार्थं जगते कलिप्रशमनं दातुं स विष्णुर्यथा
पूते कालडिधाम्नि केरलगते जातो गुरुश्शंकरः ॥

(अस्मिन् श्लोके भगवता श्रीमन्महाविष्णुना रसातलनीतवेद-त्रयत्राणाय कृतं मीनावतारं तस्य पापिष्ठदैत्यकुलाभ्युदयसंत्रस्त-

समाश्रितदेववृन्दपरिपालनसंकल्पं सर्वविदितं तथा कलिकल्मषघ्न-गीतोपदेशाय कृतं कृष्णावतारं चोल्लिख्य तादृशावतारप्रयोजनं पुनः जगद्गुरुणा श्रीमदादिशंकराचार्येण निर्वर्तितमिति श्लेषेण वर्णयति कविः यतः अधोगतवेदत्रयोद्धारणमाश्रितपण्डितजनपरिपालनं कलिकल्मषघ्नगीतार्थबोधकगीताभाष्यरचनं च जगद्गुरुणाऽपि कृतम्)

(४४)

निर्मथ्य मन्मथमथाद्रिसुतासमक्षं
सद्यस्तदीयमवभज्य मनोरथञ्च ।
केदारधाम समुपेत्य शिवस्तपोऽधात्
वैराग्यपीठमिति तेन तदामनन्ति ॥

(४५)

जीवः केदारनाथस्स च भुवनपिताऽम्बा च केदारभूता ताभ्यामुत्पाद्यमानो नर इति विदितो जीवराशिस्समस्तः । देवो नारायणाख्यो गुरुरखिलतनुः प्रापकप्राप्यभूतः तत्त्वं केदारनाथः किमिदमुपदिशत्यद्रिकूटेऽत्र तिष्ठन् ?

(४६)

दाक्षायण्या दहन्त्या मखशिखिनि मृदु स्वं वपुर्धर्मपत्न्या निर्वृत्ता निष्क्रियाऽऽसीन्निजपतिवचनानादराघानुरूपम् । के दारास्तादृशाः क्वेत्युपयमविमुखो दग्धकामो विरागः भूत्वा केदारनाथस्तपसि हिमवतो व्यग्र उग्रे किमग्रे ? ॥

(४७)

इन्द्रोपेन्द्रौ कुबेरो नर ऋषिरुपदेष्टा स नारायणर्षि-र्देवास्त्रिंशत्त्रिकोट्यो ध्रुवमित उपगम्याशु केदारनाथम् ।

साक्षाद्दाक्षायणी सा हिमगिरितनया तामुपेक्षस्व मा भोः
भूयस्तामेव शम्भो परिणय जगतां मंगलायेत्यवोचन् ।।

(४८)

अर्वाचामवबोधाय सर्वे ते त्रिदिवौकसः ।
पर्वतीभूय तिष्ठिन्ति शर्वस्य पुरतो ध्रुवम् ।।

(४९)

इन्द्रो वाहनमास्थितो वितनुते भस्माभिषेकोपमं
नूनं श्वेतहिमाभिषेकमभितः केदारनाथं पुनः ।
आदायाथ तदेव लिम्पति हिमं शम्भोर्विभूतिं यथा
शीर्षेष्वत्र समेयुषां दिविषदामीशप्रसादैषिणाम् ।।

(५०)

लोकेभ्यश्च हरप्रसादमथ तं विश्राणयन्वृत्रहा
मन्दाकिन्यभिधां प्रवाहयति किं दूतीमिव स्वर्णदीम् ।
आप्लुत्य त्वरितं प्रधाव्य चलिता भर्तुर्निदेशेन सा
गंगासंगवती पुनाति सलिलैस्त्रैलोक्यमेवाखिलम् ।।

(५१)

भूतानि पञ्चेति स भूतनाथः केदारधाम्न्यपि पञ्च चक्रे ।
भूतानि सर्वाण्युपयान्ति शान्तिं पञ्चापि ये वा प्रणमन्ति
तेषाम् ।।

(५२)

रुद्रप्रयागत उपालकनन्दमूर्ध्वं
स्थानं स कर्णतपसस्समुपेत्य सेव्यः ।

कर्णप्रयाग इति साऽलकनन्दयाऽत्र
पिण्डारिभूमिलति दूरत एत्य गंगा ।।

(कर्णप्रयागे पूर्वजन्मनि तपसा लब्धवहुकवचस्य राक्षसरूपस्य कर्णस्य केवलमेकं हित्वा अन्यान् सर्वान् कवचान् स्वतपोवलेन श्रीबदरीनारायणः पाटयामास; कर्णश्च एकेन कवचेन सहितः कुत्राप्यपलायतेति काचन कथा श्रूयते)

(५३)

कर्णप्रयागत उपर्युपगम्य दृश्यः
नन्दप्रयाग इति कोऽप्यपरः प्रयागः ।
श्रीनन्दगुण्टिहिमकूटतलप्रसूता
नन्दाकिनीति मिलतेऽलकनन्दयाऽत्र ।।

(५४)

सेव्यास्तथा विरहिगारुडबालखिल्य-
पातालललक्ष्मणविशेषणशालि गंगा ।
संगम्य साधु सरिताऽलकनन्दया याः
पुष्यन्ति पुण्यसलिलाः भुवनं पुनानाः ।।

(५५)

ज्योतिर्मठस्सुविदितः पथि सेवनीयः
यत्रादिशंकरगुरुस्तपसा प्रसाद्य ।
आद्यं नृणां गुरुवरं बदरीशमेव
ज्योतिस्स्वरूपमतिलोकमवालुलोके ।।

(५६)

यत्रादिशंकरजगद्गुरुणा तदानीं
संरोपितो निजतपोवनभूमिभागे ।
अद्यापि रोहतितितमामविनश्य वृक्षो
ज्योतिर्मठे बुधजनैरुपसेव्यमानः ।।

(५७)

कापालिकान्गुरुमुपेत्य निहन्तुकामान्
तेनार्थितस्समुदितो भगवान्नृसिंहः ।
सर्वान्निहत्य गुरुणा प्रतिपूजितोऽत्र
ज्योतिर्मठे जयति सुन्दरमन्दिरान्तः ।।

(५८)

तत्पूजनाय गुरुणा पयसामभावः
दूरीकृतोऽत्र सृजता सलिलस्य धाराम् ।
ज्योतिर्मठे प्रसरितामधुनाऽपि दण्ड-
धारेति यां सविनयं विबुधा भजन्ति ।।

(५९)

ज्योतिर्मठे विजयते बदरीविशालः
संभूय मोहनवपुः किल वासुदेवः ।
आराधयन्ति भगवन्तमितस्तमेव
ये शक्नुवन्ति बदरीं न तु गन्तुमूर्ध्वम् ।।

(६०)

आनीय मन्दिरमिदं निकषा शिवेन
सत्या अभूद्विनिहितोऽस्थिचयावशेषः ।

लिप्तं घृतं यदुपरि द्रवतां न याति
क्लृप्ता जयन्ति यदधो नव चापि दुर्गाः ॥

[श्रीसत्याः अस्थिलयावशेषे अद्य शिलीभूते लिप्तं घृतं तस्य नित्यशैत्यहेतोः कदाऽपि द्रवतां नोपेति]

(६१)

ज्योतिर्मठे तत्र समुज्जिहानः केदारनाथः कथितो भविष्यः।
शनैश्शनैर्यं परिवर्धमानं विलोकयन्विस्मयमेति लोकः ॥

(६२)

आदिशंकरजगद्गुरुशिष्यः तोटकार्य इति तेन निदिष्टः।
ज्योतिराख्यविदितोत्तरपीठे स्थापयां मठममुत्र चकार ॥

(६३)

तोटकार्यतपसा परिपूतां शीतलां गिरिगुहां रमणीयाम्।
अत्र शंकरमठः परिपाति शिष्यवृन्दपरिपूजनहेतोः ॥

(६४)

ज्योतिर्मठाद्बदरिकाध्वनि वीक्षणीयः
विष्णुप्रयाग इति कश्चन पुण्यदेशः।
अद्रेस्तुषारधवलाद्धवली स्रवन्ती
गंगा समेति सरिताऽलकनन्दयाऽत्र ॥

(६५)

विष्णुप्रयागमतिलङ्घ्य विलोकनीयः
श्रीपाण्डुकेश्वर इति प्रथितः प्रदेशः।

पाञ्चालराजसुतया सह पाण्डुपुत्राः
पञ्चात्र पूर्वमवसन्वनवासकाले ॥

(६६)

देवालयो जयति यत्र भृशं पुराणः
ध्यानाकृतेर्भगवतो बदरीश्वरस्य ।
यः पाण्डुसूनुभिरिह प्रथमं प्रणीत-
स्तेनादिशंकरजगद्गुरुणोद्धृतश्च ॥

(६७)

श्रीपाण्डुकेश्वरत ऊर्ध्वमिहाद्रिशृंगे
उद्यानमस्ति समभूमिगतं सुमानाम् ।
पुष्पाणि यत्र सुरभीणि च नैकवर्ण-
वैचित्र्यवन्ति विकसन्ति वसन्तकाले ॥

(६८)

पुष्पं सुगन्धि वहता पवनेन मन्दम्
आनीतमेकमवलोक्य हि तादृशानि ।
कृष्णा बहूनि कुसुमानि समानयेति
संमोहिता पतिमयाचत भीमसेनम् ॥

(६९)

अन्वेषयन् स कुसुमं विचरन् हि भीमः
भीमं ददर्श पुरतो निजमग्रजं प्राक् ।
अद्यापि यं किल विलोकयते हनूमां-
श्चट्टीति शैलवपुषा स्थितमत्र लोकः ॥

[उपरि विरचितैः त्रिभिः श्लोकैः श्रीमन्महाभारतवर्णितं सौगन्धिकपुष्पोपाख्यानं सूचितम्]

(७०)

निर्माय मन्दिरमितः प्रणमन्ति घण्टा
कर्णं[1] पुरा यदुपतिं परिचर्य मुक्तम् ।
प्रेतः प्रदत्त उपहारतया हि भक्त्या
येनादरेण जगृहे मधुसूदनेन ।।

(७१)

ध्यानीश्वरस्य निलये बदरीविशालं
मासान्षडत्र मनुजाः परिपूजयन्ति ।
येष्वेव सा बदरिका हिमपातहेतोः
दुष्प्रापतां भजति दुःखहरी नराणाम् ।।

(७२)

नीलकण्ठशिखरं निकषाऽधो देवदर्शनमहो मम जातम् ।
दूरदुर्गमपदंतुदमार्गक्लेश आशु नवतां मम धत्ते ।।

(७३)

किमवनी बदरीतरुमण्डिताऽभवदियं बदरीति कृताभिधा ।
बहुदरीभिरुतावृतहेतुना बहुदरी बदरीविकृतिं गता ।।

(७४)

समिन्धते पञ्च पुनर्बदर्यः हिमाद्रिश्रृंगेष्विह पावनेषु ।
पञ्चापि यः कश्चन सेवमानः न पञ्चतामेति नरः कदाऽपि ।।

---

१ श्रीहरिवंशे घण्टाकर्णोपाख्यानं द्रष्टव्यम् ।

(७५)

पाञ्चाल्या सह पञ्चपाण्डुतनयास्संत्यज्य राज्यं पुरा
स्वर्गारोहणकाम्यया बदरिकानारायणस्याश्रमम् ।
आगत्य प्रणिपत्य पर्वतपथेनैवोत्तराशां गताः
ततुं यत्र सरस्वतीं पथि पुनर्भीमश्शिलां न्यस्तवान् ।।

(७६)

इति तव बदरीश प्राप्तवन्तं समीपं
गहनमलकनन्दामार्गमालम्ब्य दीर्घम् ।
बहुभिरिममहोभिस्सानुकम्पैरुदारै-
रनुगमनुगृहाण श्रीपते त्वं कटाक्षैः ।।

(७७)

कथमपि यममर्त्याः द्रष्टुमीशाः कदापि
तमहमिह बदर्यां नाथ नारायणं त्वाम् ।
निहतनिरयगन्धं निर्निमेषं निशाम्यन्
अनिमिष इव जातस्त्वत्प्रसादेन सद्यः ।।

[निर्निमेषत्वादनिमिषः अर्थात् देव एव संजात इति यावत् ।]

(७८)

अहमिह भुवि नृणां नायको विश्वनाथो
कलयितुमुपदेशं को नरायागतोऽयम् ।
इषुभिरिति सरोषं प्राक्षिपनाकावमुक्तैः
त्वयि किल बदरीश श्रीश शूली ववर्ष ।।

(७९)

अथ रणकरणार्थं तं महादेवमेवं
कृतमतिमुपगम्य प्राह स ब्रह्मदेवः ।
प्रशमय रुषमेष ह्यावयोर्देवदेवः
जनक इति नमस्यस्सोऽपि शान्तो बभूव ।।

(८०)

त्रिपुरहरशराणां संशितानां शतानां
विषमिव वमतां त्वं लक्ष्यभूतस्तदानीम् ।
रुजमिह सहमानस्तेजसा स्वेन शान्तो
हिमगिरिबदरीशाजायथा मुञ्जकेशः ।।

(८१)

कथमपि तपसस्ते कातरीभूय भंगं
कलयितुमिह शक्रः कामिनीः प्राहिणोद्याः ।
करिकरकमनीयात् कान्तकाया तवोरोः
कदति मदममूषां काप्युदित्योर्वशीति ।।

(८२)

अथ परमवधार्यं त्वामजं देवदेवं
अवनतशिरसस्ता अस्तुवन् देवकन्याः ।
प्रसदनसुमुखात्त्वत्प्रीयमाणात्प्रकामं
प्रतिनिववृतिरेऽथ प्राप्य तामुर्वशीञ्च ।।

(८३)

उपदिशसि नराय त्वं ततो विस्मिताय
निजपदपतनं ते नित्यमाशङ्कमानाः ।

दिविषद इतरेषां विघ्नकारास्समाधे-
रहमिव भव तस्मादप्रकम्प्यस्स्थिरश्च ॥

(८४)

पुनरुपदिशसि त्वं पुण्यमार्गं नराय
पुरहरशरविद्धः पूर्वमक्रुद्ध आसम् ।
पुर इह सुरवध्वः पुष्पबाणेन नो मां
पुलकितमदधुर्वा पापदौ क्रोधकामौ ॥

(८५)

ज्वलति तव किरीटे द्वारकाधीशरत्नं
इति कथयति लोकस्तत्र किं वा विचित्रम् ।
नरमृषिमभिगोप्तुं पार्थवेषं त्वयैव
धृत इह बदरीश द्वारकाधीशवेषः ॥

(८६)

कलिसमुदयकाले द्वारकाधीशदेहं
त्वमिह भवसि यावत् द्वापरे त्यक्तुकामः ।
विरहमसहमानं तावदात्थोद्धवं तं
उपसर बदरीं मे लप्स्यसे मामिति त्वम् ॥

(८७)

त्वयि विनिहितचेता उद्धवो भावयंस्त्वां
अनवरतमुपास्य प्राप नारायणत्वम् ।
यदि न कथमनर्घां शीतमासेषु षट्सु
भजतु बदरिकेश त्वत्सपर्यां स्वयं सः ॥

(८८)

नव उषसि विगाह्य प्रत्यहं तप्तकुण्डे
नवनवमभिषेकं नाथ निध्यायतां ते ।
नरगुरुबदरीश त्वत्कटाक्षादृतानां
न हि भवति विशेषो नाकिनां वा नराणाम् ॥

(८९)

कलयितुमुपदेशं कल्मषघ्नं नराय
हिमशिखरिणि शीते नित्यवासं दधान ।
अचरमगुरुदेव प्रार्थनामप्यमूं मे
निशमय बदरीश श्रीश हे मुञ्जकेश ॥

(९०)

उपदिश भगवन्मे त्वं नरायैव पूर्व-
मयमपि नर इत्येवात्र जातानुकम्पः ।
न च गुरुमहमन्यं कामये त्वामवेतुं
नरगुरुबदरीश श्रीश भूया गुरुर्मे ॥

(९१)

भुवनमसि समस्तं वासयन्वासुदेवः
मम मनसि निवासो न त्वयोपेक्षणीयः ।
अभिलषसि यदि त्वं सत्यतामात्मनाम्नः
प्रविश बदरिकेशावासयन्नाशयं मे ॥

["वासनाद्वासुदेवस्य वासितं भुवनत्रयम्" इति श्लोकोऽत्रानुसन्धेयः]

(९२)

मुनिसमुचितवेषं त्वां जटाजूटमौलिं
स्फुटकमलवदंके कल्पितोत्तानपाणिम् ।
नरमृषिमुपदेष्टुं बद्धपद्मासनस्थं
कलयतु बदरीश स्वान्तमन्तर्निताम्तम् ।।

(९३)

अखिलभुवनसृष्टिस्ते तु लीलाविभूतिः
अपि च विविधयोनौ क्षेपणं तत्र पुंसाम् ।
अविरतभवतान्तं मां तया लीलया त्वं
अलमिति बदरीश क्षिप्रमेवोद्धरस्व ।।

(९४)

गुरुजनवचनेन त्वं दयालुः प्रतीतः
परमहमिह मग्नः पश्यतस्ते भवाब्धौ ।
अपि यदि मम तस्मिन् कर्म हेतुस्तथाऽपि
प्रथमपदि भवाब्धौ पातयामास को माम् ।।

(९५)

मुनिवरगुरुवर्याः मुक्तिकामास्ससत्त्व-
स्तव खलु कृपया ते तीर्णवन्तो भवाब्धिम् ।
लघुमगतिमसत्त्वं क्षुद्रमुत्तारयेर्मां
न यदि बदरिकेश त्वद्यशः कीदृशं तत् ?

(९६)

अविदितनिगमं मामात्मविद्याविहीनं
अनवगतपुराणं मूढमाचारहीनम् ।

अवगमयितुमर्थं त्वत्समीपं च नेतुं
क्षम इह बदरीश त्वत्कटाक्षादृते कः ?

(९७)

किमु हितमहितं किं किं नु कृत्यं त्वकृत्यं
किमिह क इह धर्मः कथ्यते को न्वधर्मः ।
इति न हि विदितं मे मन्दबुद्धेरतस्त्वं
उपदिश बदरीश श्रीश मे मुञ्जकेश ।।

(९८)

निपतितमगतिं मां नाथ संसारसिन्धौ
तिमिभिरिव च नक्रैरिन्द्रियैः कृष्यमाणम् ।
सकरुणमभिरक्षँस्तारकोपायमेकं
उपदिश बदरीश श्रीश मे मुञ्जकेश ।।

(९९)

त्वदुदितमतियोगं ध्यानराजादियोगं
त्वदविरहितयोगं ज्ञानकर्मादियोगम् ।
इतरमपि च योगं नाथ योगेश्वर त्वं
उपदिश बदरीश श्रीश मे मुञ्जकेश ।।

(१००)

कथयति गुरुरेको ज्ञानलाभेन मुक्तिं
अथ कथयति भक्तिं कोऽपि मुक्त्येकहेतुम् ।
अवगमनसमर्थो नाहमर्थस्य तेन
दिश मम बदरीश ज्ञानभक्त्योः प्रवृद्धिम् ।।

(१०१)

पितृदुहितृसुतानां देहसंबन्धबन्धं
क्षणविलयिसुखानां भोगनिर्बन्धबन्धम् ।
जननमरणचक्रभ्रान्तिदुःखानुबन्धं
शिथिलय बदरीश श्रीश संसारबन्धम् ।।

(१०२)

इह मम जनिहेतुं मृत्युहेतुं तथैव
पुनरपि जनिहेतुं मृत्युहेतुं पुनश्च ।
सततमपि च हेतुं त्वत्पदस्यानवाप्तेः
प्रशमय बदरीश श्रीश मे कर्मबन्धम् ।।

(१०३)

महत इति महीयांस्त्वं मृषा श्लाचितोऽसि
त्वदपि किल महीयानस्ति मे किल्बिषौघः ।
यदि निगमवचस्त्वं सत्यमिच्छेर्विधातुं
क्षपय बदरिकेश श्रीश मे किल्बिषौघम् ।।

[महतो महीयानिति श्रुतिवाक्यमुदाहृतम्]

(१०४)

अहमतिदयनीयः त्वं दयालुः प्रकामं
अहमतिकृपणस्त्वं सत्त्ववान् सर्वशक्तः ।
अयमहमतिदीनस्त्वं प्रभुः श्रीनिवासः
कुरु मयि बदरीश व्याजहीनानुकम्पाम् ।।

(१०५)

शुभसुभगविभूषं शोभिशृंगारवेषं
सुषममपि किरीटं शीर्षदेशे जुषाणम् ।
सुरनरगणबन्धुं सुन्दरं वन्दनीयं
हिमगिरिबदरीशं श्रीशमीशं प्रपद्ये ॥

(१०६)

निधिपतिमपसव्ये नारदं चोद्धवं च
विनतमपि दधानं वैनतेयं पुरस्तात् ।
नरमृषिमथ सव्ये नम्रमन्तेवसन्तं
हिमगिरिबदरीशं श्रीशमीशं प्रपद्ये ॥

(१०७)

विकसितमुखपद्मं पादचिह्नं भृगोस्तं
असितमुरसि च श्रीवत्सचिह्नं दधानम् ।
जटिलकुटिलकेशं जैत्रपद्मासनस्थं
हिमगिरिबदरीशं श्रीशमीशं प्रपद्ये ॥

(१०८)

चलितमुपरि नीचैः कर्मणा जन्मचक्रे
कृपणमनुशयार्तं श्रीपते दीनदीनम् ।
अनितरमनुकूलं नाथ विश्वासवन्तं
हिमगिरिबदरीश त्राहि मां त्वां प्रपन्नम् ॥

(१०९)

हिमगिरिबदरीशं जन्तुरेवं प्रपन्नः
सदयमनुगृहीतस्तेन कैंकर्यकृत्ये ।

अमुपदविनियुक्तो नित्यमुक्तो यथैव
विजयति गरुडो वा नारदो वोद्धवो वा ।।

(११०)

जिगमिषन् बदरीं शतरंगिणीं श्रयति यो बदरीशतरंगिणीम्
पठति वा बदरीशतरंगिणीं स लभते बदरीं शतरंगिणीम् ।।

(१११)

बदरीशतरंगिणीस्तुतिः भवतात्सुन्दरराजनिर्मिता ।
बदरीशतरंगिणी यथा विबुधानां प्रियवाहिनी सदा ।।

[बदरीशतरंगिणीनाम्नी इयं स्तुतिः यथा बदरीशस्य तरंगिणी अर्थात् अलकनन्दा नदी विबुधानां देवानां प्रियवाहिनी प्रियनदी तथा विबुधानां पण्डितानां प्रियवाहिनी प्रियं वहन्ती भवत्विति कवेरभिलाषः ।]

(११२)

अहन्यहन्यधीयानाः बदरीशतरंगिणीम् ।
दयां तवाप्नुयुर्नूनं बदरीश ! तरंगिणीम् ।।

इति श्री महाकविसार्वभौमविल्लूरनडादूर श्रीनिधिराधवाचार्यस्वामितनूजेन श्रीसुन्दरराजेन विरचिता 'श्रीबदरीशतरङ्गिणी' सम्पूर्णा ।

English Translation
of
SHRI BADARISHA TARANGINI

1. I take refuge in the Badridham surrounded by snowclad mountains of the Himalayas where the sages Nara and Narayana are eternally present.
2. I worship sage Narayana who is teaching the DOs and DONTs to sage Nara there and explaining as to where the path of knowledge and action would lead men ultimately.
3. I salute Sage Nara, the first born of us men, for whom Lord Narayana Himself is the preceptor over there.
4. I worship our great great grand-mother, the mother of both Nara and Narayana, worshipped in a temple in the neighbouring village of Mana.
5. I take shelter in Lord Adisesha who is lying still at a place near Badridham and hearing the teachings of Lord Narayana through his eyes.
   (As the snakes have no ears, the eyes are said to be their senses for hearing).
6. Garuda, the celestial bird performed penance for 30000 years there and became the eternal servant of Lord Narayana in Vaikuntha through His grace.
7. Narada, the divine Sage is for ever enjoying the exposition of Lord Narayana over there unmindful of the curse of Daksha (Daksha is said to have cursed Sage Narada that he cannot stay at one place for more than two minutes).

---

* In Sanskrit this title would mean the river of the Lord of Badri, i.e., Alaknanda. It would also mean the many splendoured or the multi staged Badridham itself.

8. I worship the Tapta Kunda or the hot water spring welling up at the Badridham with the grace of Lord Narayana, where a person taking bath is relieved of his pains and sins both.
9. Between the two hills called Nara and Narayana respectively there fllows the river Alaknanda also known as the Vishnu Ganga.
10. Her waters swell with the waters flowing down from the falls like vasudhara on the way and with the waters of the river Saraswathi which joins her in Mana village.
11. She is the world-famous Badarisha Tarangini or the river of the Lord of Badri that makes Badri many-splendoured with her stream.
12. I always worship her; she flows from Alaka the capital of Lord Kubera; she is very cold; she has several falls; she is hallowed by the Lord of Badri; a strong breeze blows by her side; she is swift; even the Gods sing her praise.
13. I worship Lord Narayana at Badri seated on the Urvashi Peet a located at the centre of Bhairavi Chakra and surrounded by Garuda, Uddhava and Narada.
14. I worship Lord Badrivishal. endowed with exemplary qualities who is worshipped conveniently by men for six months and secretly by gods for the remaining six months of a year.
